# Ganesha Tejovardhanastotram

# ગાણેશતેજોવર્ધનસ્તોત્રમ્

## Document Information

Text title : gaNeshatejovardhanastotram

File name : gaNeshatejovardhanastotram.itx

Category : ganesha

Location : doc_ganesha

Proofread by : NA

Source : Mudgalapurana khaNDa 2, adhyAya 60, shlokAH 35-51.1-62

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# ગાણેશતેજોવર્ધનસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ -
નમો નમસ્તે ગણનાથ ઢુણ્ઢે સદા સુશાન્તિપ્રદ શાન્તિમૂર્તે ।
અપારયોગેન ચ યોગિનસ્ત્વાં ભજન્તિ ભાવેન નમો નમસ્તે ॥ ૧॥

પ્રજાપતીનાં ત્વમથો વિધાતા સુપાલકાનાં ગણનાથ વિષ્ણુઃ ।
હરોઽસિ સંહારકરેષુ દેવ કલાંશમાત્રેણ નમો નમસ્તે ॥ ૨॥

ક્રિયાત્મકાનાં જગદમ્બિકા ત્વં પ્રકાશકાનાં રવિરેવ ઢુણ્ઢે ।
યત્નપ્રદાનાં ચ ગુણેશ નામા કલાંશમાત્રેણ નમો નમસ્તે ॥ ૩॥

શરીરભાજાં ત્વમથાસિ બિન્દુઃ શરીરિણાં સોઽહમથો વિભાસિ ।
સુબોધરૂપઃ સ્વત ઉત્થકાનાં કલાંશમાત્રેણ નમો નમસ્તે ॥ ૪॥

વિદેહકાનામસિ સાઙ્ખ્યરૂપઃ સમાધિદાનાં ચ નિજાત્મકસ્ત્વમ્ ।
નિવૃત્તિયોગે ત્વમયોગધારી કલાંશમાત્રેણ નમો નમસ્તે ॥ ૫॥

ગણાસ્ત એતે ગણનાથનામ્ના ત્વમેવ વેદાદિષુ યોગકીર્તે ।
સદા સુશાન્તિપ્રદ સંસ્થિતોઽસિ ભક્તેશ ભક્તિપ્રિય તે નમો વૈ ॥ ૬॥

ગકારસિદ્ધિસ્ત્વપિ મોહદાત્રી ણકારબુદ્ધિસ્ત્વથ મોહધાત્રી ।
તયોર્વિલાસી પતિરેવ નામ્ના ગણેશ્વરસ્ત્વં ચ નમો નમસ્તે ॥ ૭॥

ગકારરૂપેણ ભવાન્ સ ગૌણો ણકારરૂપેણ ચ નિર્ગુણોઽસિ ।
તયોરભેદે ગણનાથનામા યોગેશ ભક્તેશ નમો નમસ્તે ॥ ૮॥

કિં વદામિ ગણાધીશ મહિમાનં મહાદ્ભુતમ્ ।
યત્ર વેદાદયો ભ્રાન્તા ઇવ જાતાઃ પ્રવર્ણને ॥ ૯॥

પતિતાનામહં શ્રેષ્ઠઃ પતિતોત્તમ એવ ચ ।
તવ નામપ્રભાવેણ જાતોઽહં બ્રાહ્મણોત્તમઃ ॥ ૧૦॥

કિઞ્ચિત્સંસ્કારયોગેન વિશ્રામિત્રાદયઃ પ્રભો ।
જાતા વૈ બ્રાહ્મણત્વસ્ય બ્રાહ્મણાનિર્મલાઃ પુરા ॥ ૧૧॥

અહં સંસ્કારહીનશ્ચ જાત્યા કૈવર્તકોદ્ભવઃ ।
તત્રાઽપિ પાપસક્તાત્મા ત્વયા ચ બ્રાહ્મણઃ કૃતઃ ॥ ૧૨॥

એવમુક્ત્વા નતં વિપ્રં પ્રાઞ્જલિં પુરતઃ સ્થિતમ્ ।
ભક્તિભાવેન સન્તુષ્ટસ્તમુવાચ ગજાનનઃ ॥ ૧૩॥

ગણેશ ઉવાચ -
વરાન્વરય દાસ્યામિ યાંસ્ત્વં વિપ્ર પ્રવાઞ્છસિ ।
ત્વત્સમો નૈવ તેજસ્વી ભક્તો મે પ્રભવિષ્યતિ ॥ ૧૪॥

તસ્ય તદ્વચનં શ્રુત્વા સાશ્રુનેત્રો મહામુનિઃ ।
ભ્રૂશુણ્ડી ગદ્ગદોક્ત્યા ચ તં જગાદ ગજાનનમ્ ॥ ૧૫॥

યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
ત્વદીયાં ભક્તિમુગ્રાં મે દેહિ સમ્પૂર્ણભાવતઃ ॥ ૧૬॥

તથેતિ તમુવાચાથ ગણેશો ભક્તવત્સલઃ ।
ક્ષેત્રં ત્વદીયમત્રૈવ ભવિષ્યતિ મદાજ્ઞયા ॥ ૧૭॥

અમલાશ્રમકં નામ્ના જનાનાં સેવિનાં સદા ।
અજ્ઞાનજ મલં હત્વા જ્ઞાનં દાસ્યતિ નિર્મલમ્ ॥ ૧૮॥

એવમુક્ત્વાંઽતર્દધે ચ ગણેશો દેવનાયકઃ ।
ભ્રૂશુણ્ડી ભક્તિભાવેન ભેજે વૈ તં નિરન્તરમ્ ॥ ૧૯॥

નાન્યત્ સ મનસા ક્વાપિ ક્ષેત્રં દેવાદિકં મુનિઃ ।
તીર્થં જજ્ઞૌ સ યોગીન્દ્રો ગણેશાનાન્ન સંશયઃ ॥ ૨૦॥

તતસ્તત્ર મહાક્ષેત્રે બ્રાહ્મણાદ્યા યયુર્મુદા ।
તત્રૈવ ગણનાથં તે ભેજિરે ભક્તિભાવતઃ ॥ ૨૧॥

શિષ્યાસ્તસ્ય મહાભાગા જાતા બ્રહ્મર્ષયોઽમલાઃ ।
ક્ષેત્રસંન્યાસભાવેન તેઽસેવન્ત મહામુનિમ્ ॥ ૨૨॥

ભ્રૂશુણ્ડિનસ્તત્ર તીર્થં ગણેશસ્ય ચ સુન્દરમ્ ।
ભુક્તિમુક્તિપ્રદં પ્રોક્તં સ્નાનમાત્રેણ જન્તવે ॥ ૨૩॥

તસ્યૈવં દર્શનાર્થં ચ મુનયઃ કશ્યપાદયઃ ।

શુકાદિયોગિનઃ સર્વે ગત્વા તેઽપૂજયન્ મુદા ॥ ૨૪॥

કૃતાર્થં મન્યમાનાશ્ચ સ્વસ્થલં તે યયુઃ પુનઃ ।
પ્રશંસન્તો મુનિં સર્વે સાક્ષાચ્છુણ્ડાધરં પ્રભુમ્ ॥ ૨૫॥

ઇન્દ્રાદયસ્તમેવં ચ દર્શનાર્થં સમાગતાઃ ।
કૃતકૃત્યાઃ સ્વભાવેન સ્વાલયં તે યયુઃ પુનઃ ॥ ૨૬॥

બ્રહ્મવિષ્ણુમહેશાદ્યા ઈશ્વરાસ્તે મહામુનેઃ ।
નિત્યદર્શનસંસક્તા બભૂવુર્હૃષ્ટમાનસાઃ ॥ ૨૭॥

એવં પ્રભાવયુક્તઃ સ ભ્રૂશુણ્ડી કથિતો મયા ।
ચાણ્ડાલો બ્રાહ્મણો જાતો ગણેશસ્મરણેન વૈ ॥ ૨૮॥

॥ ઇતિ શ્રીમન્મૌદ્ગલે મહાપુરાણે દ્વિતીયે ખણ્ડે એકદન્તચરિતે
ભ્રૂશુણ્ડિબ્રાહ્મણત્વવર્ણનં નામ ષષ્ટિતમોઽધ્યાયે
ગાણેશતેજોવર્ધનસ્તોત્રં સમ્પૂર્ણમ્ ।

mudgalapurANa khaNDa 2, adhyAya 60, shlokAH 35-51.1, phalashruti till 62
NA

*Ganesha Tejovardhanastotram*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*